श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.20- चतुर्थ सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥

नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥

### श्रीमद्भागवतमहापुराणम्

### एकादशः स्कन्धः

### ॥ अथ विं(म्)शोऽध्यायः ॥

उद्धव उवाच

विधिश्च प्रतिषेधश्च, निगमो हीश्वरस्य ते ।
अवेक्षतेऽरविन्दाक्ष, गुणं(न्) दोषं(ञ्) च कर्मणाम् ॥ 1॥

अवेक्षतेऽ+ रविन्दाक्ष

वर्णाश्रमविकल्पं(ञ्) च, प्रतिलोमानुलोमजम् ।
द्रव्यदेशवयः(ख्)कालान्, स्वर्गं(न्) नरकमेव च ॥ 2॥

वर्णाश्र+ मविकल्पं(ञ्),प्रतिलोमा+ नुलो+ मजम्

गुणदोषभिदादृष्टि- मन्तरेण वचस्तव ।
निः(श्)श्रेयसं(ङ्) कथं(न्) नृणां(न्), निषेधविधिलक्षणम् ॥ 3॥

गुणदोष+ भिदादृष्टि ,निषे+ धविधि+ लक्षणम्

पितृदेवमनुष्याणां(व्ँ), वेदश्चक्षुस्तवेश्वर ।

श्रेयस्त्वनुपलब्धेऽर्थे, साध्यसाधनयोरपि ॥ 4॥

पितृदेव+ मनुष्याणां(व्ँ), वेदश्+ चक्षुस्+ तवेश्वर

श्रेयस्+ त्वनु+ पलब्धेऽर्थे ,साध्य+ साध+ नयो+ रपि

गुणदोषभिदादृष्टिर्- निगमात्ते न हि स्वतः ।

निगमेनापवादश्च, भिदाया इति ह भ्रमः ॥ 5॥

गुणदोष+ भिदा+ दृष्टिर् ,निगमेना+ पवा+ दश्च

श्रीभगवानुवाच

योगास्त्रयो मया प्रोक्ता, नृणां(म्) श्रेयोविधित्सया ।

ज्ञानं(ङ्) कर्म च भक्तिश्च, नोपायोऽन्योऽस्ति कुत्रचित् ॥ 6॥

योगास्+ त्रयो, श्रेयो+ विधित्+ सया, नोपायोऽन्+ योऽस्ति

निर्विण्णानां(ञ्) ज्ञानयोगो, न्यासिनामिह कर्मसु ।

तेष्वनिर्विण्णचित्तानां(ङ्), कर्मयोगस्तु कामिनाम् ॥ 7॥

तेष्व+ निर्विण्ण+ चित्तानां(ङ्)

यदृच्छया मत्कथादौ, जातश्रद्धस्तु यः(फ्) पुमान् ।

न निर्विण्णो नातिसक्तो, भक्तियोगोऽस्य सिद्धिदः ॥ 8॥

तावत् कर्माणि कुर्वीत, न निर्विद्येत यावता ।

मत्कथाश्रवणादौ वा, श्रद्धा यावन्न जायते ॥ 9॥

मत्कथा+ श्रवणादौ

स्वधर्मस्थो यजन् यज्ञै- रनाशीः(ख्) काम उद्धव ।

न याति स्वर्गनरकौ, यद्यन्यन्न समाचरेत् ॥ 10॥

यद्यन्+ यन् +न

अस्मिँल्लोके वर्तमानः(स्), स्वधर्मस्थोऽनघः(श्) शुचिः ।
ज्ञानं(वँ) विशुद्धमाप्नोति, मद्भक्तिं(वँ) वा यदृच्छया ॥ 11॥

स्वधर्मस्+ थोऽनघः(श्), विशुद्ध+ माप्+ नोति

स्वर्गिणोऽप्येतमिच्छन्ति, लोकं(न्) निरयिणस्तथा ।
साधकं(ञ्) ज्ञानभक्तिभ्या- मुभयं(न्) तदसाधकम् ॥ 12॥

स्वर्गिणोऽप्+ ये+ तमिच्छन्ति, निरयि+ णस्तथा

न नरः(स्) स्वर्गतिं(ङ्) कां(ङ्)क्षेन्- नारकीं(वँ) वा विचक्षणः ।
नेमं(लँ) लोकं(ञ्) च कां(ङ्)क्षेत, देहावेशात् प्रमाद्यति ॥ 13॥

एतद् विद्वान् पुरा मृत्यो- रभवाय घटेत सः ।
अप्रमत्त इदं(ञ्) ज्ञात्वा, मर्त्यमप्यर्थसिद्धिदम् ॥ 14॥

मर्त्य+ मप्यर्थ+ सिद्धिदम्

छिद्यमानं(यँ) यमैरेतैः(ख्), कृतनीडं(वँ) वनस्पतिम् ।
खगः(स्) स्वकेतमुत्सृज्य, क्षेमं(यँ) याति ह्यलम्पटः ॥ 15॥

स्वके+ तमुत्+ सृज्य

अहोरात्रैश्छिद्यमानं(म्), बुद्ध्वाऽऽयुर्भयवेपथुः ।
मुक्तसं(ङ्)ग(फ्) परं(म्) बुद्ध्वा, निरीह उपशाम्यति ॥ 16॥

अहोरात्रैश्+ छिद्यमानं(म्), बुद्ध्वाऽऽयुर्+ भयवे+ पथुः

नृदेहमाद्यं(म्) सुलभं(म्) सुदुर्लभं(म्)
प्लवं(म्) सुकल्पं(ङ्) गुरुकर्णधारम् ।
मयानुकूलेन नभस्वतेरितं(म्)
पुमान् भवाब्धिं(न्) न तरेत् स आत्महा ॥ 17॥

नृदे+ हमाद्यं(म्) ,नभस्+ वतेरितं(म्)

यदाऽऽरम्भेषु निर्विण्णो, विरक्तः(स्) सं(यँ)यतेन्द्रियः ।
अभ्यासेनात्मनो योगी, धारयेदचलं(म्) मनः ॥ 18॥

धारये+ दचलं(म्)

धार्यमाणं(म्) मनो यर्हि, भ्राम्यदाश्वनवस्थितम् ।
अतन्द्रितोऽनुरोधेन, मार्गेणात्मवशं(न्) नयेत् ॥ 19॥

भ्राम्यदाश् + वन+ वस्थितम्, अतन्द्रितोऽ+ नुरोधेन ,मार्गेणात्+ मवशं(न्)

मनोगतिं(न्) न विसृजेज्- जितप्राणो जितेन्द्रियः ।
सत्त्वसम्पन्नया बुद्ध्या, मन आत्मवशं(न्) नयेत् ॥ 20॥

सत्त्वसम् + पन्+ नया

एष वै परमो योगो , मनसः(स्) सं(ङ्)ग्रहः(स्) स्मृतः ।
हृदयज्ञत्वमन्विच्छन्, दम्यस्येवार्वतो मुहुः ॥ 21॥

हृदय+ ज्ञत्व+ मन्विच्छन् ,दम्यस्+ येवार्+ वतो

सां(ङ्)ख्येन सर्वभावानां(म्), प्रतिलोमानुलोमतः ।
भवाप्ययावनुध्यायेन् - मनो यावत् प्रसीदति ॥ 22॥

प्रतिलोमा+ नुलोमतः, भवाप्+ ययावनु+ ध्यायेन्

निर्विण्णस्य विरक्तस्य, पुरुषस्योक्तवेदिनः ।
मनस्त्यजति दौरात्म्यं(ञ्), चिन्तितस्यानुचिन्तया ॥ 23॥

पुरुषस्+ योक्त+ वेदिनः, मनस्+ त्यजति, चिन्+ तितस्+ यानुचिन्तया

यमादिभिर्योगपथै- रान्वीक्षिक्या च विद्यया ।
ममार्चोपासनाभिर्वा, नान्यैर्योग्यं(म्) स्मरेन्मनः ॥ 24॥

यमा+ दिभिर्+ योगपथै, रान्वी+ क्षिक्या ,ममार्+ चोपा+ सनाभिर्वा

यदि कुर्यात् प्रमादेन, योगी कर्म विगर्हितम् ।
योगेनैव दहेदं(म्)हो, नान्यत्तत्र कदाचन ॥ 25॥

नान्यत्+ तत्र

स्वे स्वेऽधिकारे या निष्ठा, स गुणः(फ्) परिकीर्तितः ।
कर्मणां(ञ्) जात्यशुद्धाना- मनेन नियमः(ख्) कृतः ।
गुणदोषविधानेन, सं(ङ्)गानां(न्) त्याजनेच्छया ॥ 26॥

त्या+ जनेच्छया

जातश्रद्धो मत्कथासु , निर्विण्णः(स्) सर्वकर्मसु ।
वेद दुःखात्मकान् कामान् , परित्यागेऽप्यनीश्वरः ॥ 27॥

परि+ त्यागेऽप्य+ नीश्वरः

ततो भजेत मां(म्) प्रीतः(श्), श्रद्धालुर्दृढनिश्चयः ।
जुषमाणश्च तान् कामान्, दुःखोदर्कां(म्)श्च गर्हयन् ॥ 28॥

श्रद्धालुर्+ दृढनिश्चयः, दुःखो+ दर् +कां(म्)श्च

प्रोक्तेन भक्तियोगेन, भजतो मासकृन्मुनेः ।
कामा हृदय्या नश्यन्ति, सर्वे मयि हृदि स्थिते ॥ 29॥

भिद्यते हृदयग्रन्थिश्- छिद्यन्ते सर्वसं(म्)शयाः।
क्षीयन्ते चास्य कर्माणि, मयि दृष्टेऽखिलात्मनि ॥ 30॥

हृदय+ ग्रन्थिश्

तस्मान्मद्भक्तियुक्तस्य, योगिनो वै मदात्मनः ।
न ज्ञानं(न्) न च वैराग्यं(म्), प्रायः(श्) श्रेयो भवेदिह ॥ 31॥

तस्मान्+ मद्+ भक्ति+ युक्तस्य

यत् कर्मभिर्यत्तपसा, ज्ञानवैराग्यतश्च यत् ।
योगेन दानधर्मेण, श्रेयोभिरितरैरपि ॥ 32॥

कर्मभिर्+ यत्+ तपसा, श्रेयो+ भिरि+ तरै+ रपि

सर्वं(म्) मद्भक्तियोगेन, मद्भक्तो लभतेऽञ्जसा ।

स्वर्गापवर्गं(म्) मद्धाम, कथं(ञ्)चिद् यदि वाञ्छति ॥ 33॥

स्वर्गा+ पवर्गं(म्)

न किं(ञ्)चित् साधवो धीरा, भक्ता ह्येकान्तिनो मम ।

वाञ्छन्त्यपि मया दत्तं(ङ्), कैवल्यमपुनर्भवम् ॥ 34॥

कैवल्य+ मपुनर्भवम्

नैरपेक्ष्यं(म्) परं(म्) प्राहुर्- निः(श्)श्रेयसमनल्पकम् ।

तस्मान्निराशिषो भक्तिर्- निरपेक्षस्य मे भवेत् ॥ 35॥

निः(श्)श्रेय+ सम+ नल्पकम् ,तस्मान्+ निरा+ शिषो

न मय्येकान्तभक्तानां(ङ्), गुणदोषोद्भवा गुणाः ।

साधूनां(म्) समचित्तानां(म्), बुद्धेः(फ्) परमुपेयुषाम् ॥ 36॥

मय्येकान्+ तभक्तानां(ङ्) गुण+ दोषोद् +भवा

एवमेतान् मयाऽऽदिष्टा- ननुतिष्ठन्ति मे पथः ।

क्षेमं(वँ) विन्दन्ति मत्स्थानं(यँ), यद् ब्रह्म परमं(वँ) विदुः ॥ 37॥

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)

सं(म्)हितायां(म्) एकादशस्कन्धे विंशोऽध्यायः ॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

